योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०१७

सप्तदशः सर्गः १७

श्रीवसिष्ठ उवाच ।

अनहंवेदनादेवं शुभाशुभफलप्रदा ।

संसारफलिनी नूनमिच्छान्तरुपशाम्यति ।। १

अनहंवेदनाभ्यासात्समलोष्टाश्मकाञ्चनः ।

भूत्वा शान्तभवापीडो न नरः परिताम्यति ।। २

अहंतापुटकोड्डीनपरबोधबलेरितः ।

अहमित्यर्थपाषाणो न जाने क्वाशु गच्छति ।। ३

अहंतापुटकोड्डीनो ब्रह्मवीरबलेरितः ।

अहमित्यर्थपाषाणो न जाने क्वाशु गच्छति ।। ४

अहंतापुटकोड्डीनो ब्रह्मवीरबलेरितः ।

शरीरयन्त्रपाषाणो न जाने क्वाशु गच्छति ।। ५

अहमर्थहिमं त्वन्तरनहंता चिदर्चिषा ।

उड्डीयेव विलीनं सन्न जाने क्वाशु गच्छति ।। ६

अहंरसो विलीनोन्तरनहंताचिदर्चिषा ।

शरीरपर्णादुद्वर्णान्न जाने क्वाशु गच्छति ।। ७

शरीरपर्णान्निष्पीतस्त्वहंभावरसासवः ।

अनहंतार्कमार्गेण परतामधिगच्छति ।। ८

शयने कर्दमे शैले गृहे व्योम्नि स्थले जले ।

स्थूला सूक्ष्मा निराकारा रूपान्तरगतापि च ।। ९

यत्र तत्र स्थिता सुप्ता प्रबुद्धा भस्मतां गता ।।

धृता नीता निमग्ना च दूरस्था निकटा सती ।। १०

शरीरवटधानान्तःस्थिताहंत्वनवांकुरा ।

शास्त्राजालं तनोत्याशु संसाराख्यमिदं क्षणात् ।। ११

अहंत्ववटधानान्तःस्थितदेहबृहद्द्रुमः ।

संसारशाखानिवहं यत्र तत्र तनोत्यलम् ।। १२

शाखाशतेद्धदलपुष्पफलद्रुमोऽस्ति

बीजोदरे ननु दृशा परिदृश्यतेऽसौ ।

देहोऽस्त्यहंत्वकणिकान्तरशेषदृश्य-

संवित्परीत इति बुद्धिदृशैव दृष्टम् ।। १३

देहादहंत्वमनवाप्तवतो विचारै-

श्चिद्व्योममात्रवपुषो वपुषोऽथ वोच्चैः ।

नाहंत्वबीजजठरादसतोऽभ्युदेति

संसारवृक्ष इह बोधमहाग्निदग्धात् ।। १४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मोक्षो० निर्वाणप्रकरणे उ० अहंत्वासत्तायोगोपदेशो नाम सप्तदशः सर्गः ।।१७।।